DITTO WS

Reg. No. : ....................................

Name : ........................................

**SY-10**

# SECOND YEAR HIGHER SECONDARY EXAMINATION, MARCH 2020

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

***General Instructions to Candidates :***

- There is a 'Cool-off time' of 15 minutes in addition to the writing time.
- Use the 'Cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- Read the instructions carefully.

DITTO WS

**I.** **अधोनिर्दिष्टानां प्रश्नानां उत्तराणि कोष्ठकात् निर्धार्य लिखत ।** **(5 × 1 = 5)**

(1) गीतगोविन्दस्य कर्ता कः ?

(जयदेवः, वेदव्यास; कालिदास;)

(2) पितरौ कृतज्ञतापूर्वं कम् अनमताम् ?

(व्याधम्, वृक्षराजम्, सर्पम्)

(3) "सालारः" इति कस्य नाम ?

(गृहस्य, यानस्य, वृद्धसदनस्य)

(4) चाणक्यस्य अपरं नाम किम् ?

(कौटिल्यः, राक्षसः. चन्द्रगुप्तः)

(5) योगदर्शनस्य प्रणेता कः ?

(पाणिनिः, पतञ्जलिः, कपिलः)

**II.** **अधः प्रदत्तं गीतं पठित्वा सूचनामनुसृत्य आस्वादनटीकां रचयत ।** **(1 × 6 = 6)**

(1) सरसमसृणमपि मलयजपङ्कं ।
पश्यति विषमिव वपुषि सशङ्कम् ।।

(2) नयनविषयमपि किसलयतल्पं ।
कलयति विहितहुताशनकल्पम् ।।

(3) हरिरिति हरिरिति जपति सकामं
विरहविहितमरणेव निकामम् ।

(**सूचना** – आमुखम्, आशयम्, आस्वादनम्)

DITTO
WS

**III. गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **(5 × 1 = 5)**

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः । पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावत् वृक्ष एव पितरौ । स अस्मान् पोतकानिव संरक्षति स्म ।

मम अनुजानां शब्दं श्रुत्वा नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यम् । तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हतोऽस्मि !' इति रुदितमश्रौषम् । वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि आपतत् इव ।

अहो ! वृक्षराजः अस्मानरक्षत् इति संचिन्त्य सर्वे समाश्वस्ताः ।

(1) कौ भोजनमन्विष्य गतौ ?

(2) वृक्षस्य अधः किम् अपश्यत् ?

(3) 'हा हतोऽस्मि' – कस्य रोदनमिदम् ?

(4) सर्वे समाश्वस्ताः – कथम् ?

(5) गद्यभागं पठित्वा उचितशीर्षकं लिखत ।

**IV. कथांशान् क्रमीकृत्य कथास्तम्भं रचयत ।** **(1 × 5 = 5)**

- अन्तेवासिनः तं निबन्ध्य रक्षिपुरुषसमीपं नीतवन्तः ।
- चोरस्य रोदनसम्मिश्रः वायुः श्वसनयोग्यो न भवेत् इत्युक्त्वा ततो निर्जगाम ।
- चोरः कदलीफलगुञ्जम् अपाहरत् ।
- न्यायाधीशः चोराय एकाधिकं शतं ताडनं अदण्डयत् ।
- गुरुः वृत्तान्तमिमम् अशृणोत् ।

**V.** **श्लोकं पठित्वा गद्यक्रमं पूरयत ।** **(1 × 4 = 4)**

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः ।

अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः ।।

______ एष बालकः ______ ज्ञानपूर्णः च ______ अद्भुतानन्दशान्तिभिः ______ अवर्धत ।

**VI.** **मलयालभाषया आङ्गलभाषया वा अनुवदत ।** **(1 × 5 = 5)**

'यशोधरे ! अद्याहं लोकमपश्यम् । वार्धक्यं मरणं चापश्यम् । रोगं वेदनां चापश्यम् । 'साधारणम्' अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम् । बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन सखीभिः सह विचरन्त्यवसरे ।'

**VII.** **अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत ।** **(1 × 6 = 6)**

(1) प्रदत्तं गद्यभागं पठित्वा पटकथामेकां लिखत ।

कतिपयदिनानन्तरं सः मात्रा दाक्ष्या साकं जलमाहर्तुं नदीमगच्छत् । दैनिकक्रम इव माता कुम्भे जलं पूरयित्वा तटगते शिलातले न्यस्यति स्म । सा पुत्रमेवम् अवदत् – "पुत्र ! निरन्तरं घटविन्यासेन – तदधोभागस्य चिह्नं शिलोपरि न पश्यसि किम् ? एवं शिलायामपि परिणामो भवति, तथापि किं नु खलु त्वयि न ? कष्टेयं दशा ।"

(2) विरहिण्याः राधायाः अवस्थामधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत ।

**सूचना :**
- आवासो विपिनायते ।
- हारं भारं मनुते ।
- विषमिव पश्यति ।
- विगलितनालम् ।
- किसलयतल्पम् ।
- सकामं जपति ।

DITTO WS

VIII. उदाहरणानुसारं वाक्यद्वयं योजयत । (2 × 1 = 2)

उदा : पुस्तकं पश्यति । पाठं वाचयति । – पुस्तकं दृष्ट्वा पाठं वाचयति ।

(1) विद्यालयं गच्छति । पाठं पठति । - ________________ ।

(2) घण्टानादं श्रुणोति । कक्ष्यां आगच्छति । - ________________ ।

IX. प्रदत्तेभ्यः वाक्येभ्यः क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि चित्वा लिखत । (3 × 1 = 3)

चोरस्य दण्डनवार्तां श्रुत्वा गुरुदेवः खिन्नः अभवत् । स्वामिनः भूतदयालुताम् अवधार्य सः न्यायाधिपः तं चोरं स्वेच्छया गन्तुम् अनुजज्ञे ।

(1) क्त्वान्तम् - ____________ ।

(2) ल्यबन्तम् - ____________ ।

(3) तुमुन्नन्तम्- ____________ ।

X. रेखाङ्कितपदानां स्थाने समानार्थकपदानि कोष्टकादुद्धृत्य वाक्यं पुनः लिखत । (4 × 1 = 4)

ओडीषायाः विश्रुतया 'प्रतिभा रे' नामिकया आख्यात्र्या एषा नदी प्राचीप्रभेति कथ्यते । प्राचीं प्रवहन्ती नदी इत्यतः एव प्राची इति नाम प्रसिद्धं भवेत् । अत्र विद्यमानासु नदीषु परिपक्वा कविता दरीदृश्यते । चित्रोत्पला, कुशभद्रा, चन्द्रभागा इत्याद्याः । चन्द्रभागा यत्र सागरं संस्पृशति तत्रैव शिल्पकलायाः परा काष्ठेति पश्चात् प्रसिद्धं सूर्यमन्दिरं प्रादुरभवत् । सूर्यं भ्रमन्त्याः पृथिव्याः भ्रमणपथे विद्यमानेषु सविशेषबिन्दुषु अन्यतमः भवति कोणार्कः ।।

(समुद्रः, भूमेः, प्रसिद्धया, लेखिकया)

P.T.O.

**XI. संस्कृतभाषया अनुवदत ।** **(3 × 1 = 3)**

(1) ആറ് ദർശനങ്ങളിൽ ഒന്നാണ് യോഗദർശനം.

(Yoga is one among the six dar̗sana's)

(2) പതഞ്ജലി മഹർഷിയാണ് യോഗസൂത്രത്തിന്റെ രചയിതാവ്.

(Sage Patanjali is the auther of "Yogasùtra".)

(3) ഇന്ന് ലോകത്തെല്ലായിടത്തും യോഗപരിശീലന കേന്ദ്രങ്ങൾ ഉണ്ട്.

(Now a days, Yoga teaching centers are there all over the World.)

**XII उदाहरणानुसारं पदच्छेदं लिखत ।** **(2 × 1 = 2)**

**उदा :** चोपलभ्यते = च + उपलभ्यते ।

(1) चोक्तम् = ______ + _______ ।

**उदा :** समाधिरिति = समाधिः + इति ।

(2) हरिरिति = ______ + ______ ।

**XIII. अधोदत्तयो प्रश्नयोः एकस्य उत्तर लिखत ।** **(1 × 6 = 6)**

(1) श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।

स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।

(1) क्रोधात् कः जायते ?

(2) स्मृतिभ्रंशात् किं भवति ?

(3) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

(2) प्रदत्तसूचनानुसारं मुद्राराक्षसं नाम नाटकमधिकृत्य लघुटिप्पणीं लिखत ।

**सूचना –** विशाखदत्तः ।

सप्त अङ्काः ।

कौटिल्यः ।

नीतिबोधस्य परा काष्ठा ।

वीररसप्रधानः ।

DITTO WS

XIV. अधोदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत । (1 × 8 = 8)

(1) खण्डिकां पठित्वा पद्मश्री पी.के. नारायणन्नम्प्यार् महोदयस्य जीवनचरितं लिखत ।

पद्मश्री पी.के. नारायणन् नम्प्यार् महोदयः, पालक्काट् जिल्लायां लाक्किटि नाम ग्रामे किल्लिकुरिश्शिमङ्गलं नाम देशे 27-05-1926 तिथौ जनिमलभत । तस्य पितरौ पद्मश्री माणिमाधवचाक्यार्, श्रीदेवीनङ्ङ्यारम्मा च । तस्य गुरुः कोच्चाम्पिल्लि रामन्नम्प्यार् आसीत् । कूटियाट्टम, नङ्ङ्यार्कूत्त्, पाठकम् इत्यादि कलाप्रयोगेषु सः शोभितवान् । अन्तकवधं, श्रीकृष्णचरितम्, नङ्ङ्यार्कूत्तू, मन्त्राङ्कम्, इत्यादि ग्रन्थाः, तेन विरचिताः । पद्मश्रीः, नाट्यपुरस्काराश्च तेन प्राप्ताः ।

नाम –

देशः –

जननम् –

पितरौ –

गुरुः –

कलाप्रयोगाः –

रचनाः –

पुरस्काराः –

(2) विश्वे संस्कृतस्य प्राधान्यं इतिविषये सूचनानुसारम् एकम् उपन्यासं लिखत ।

**सूचना** – सुभाषितानि ।

रामायणम् ।

महाभारतम् ।

आयुर्वेदः ।

योगशास्त्रम् ।

संस्कृतसाहित्यम् ।

कूटियाट्टम् ।

**XV.** प्रदत्तस्य पाठभागस्य आशयं संगृह्य लिखत ।

**(1 × 5 = 5)**

आत्मनाथवियोगात् व्रणितात्मा यशोधरा भूतकालस्मृतिषु व्यापृता अभवत् । तत्र भवान् छन्देन सहैव जनपदं द्रष्टुं प्रातिष्ठत । सायं प्रत्यागताः उद्यानस्य बिल्ववेदिकायां तूष्णीमुपाविशत् । तन्नेत्रे अर्धनिमोलिते आस्ताम् ।

'यशोधरे !' अद्याहं लोकमपश्यम् । वार्धक्यं मरणं चापश्यम् । रोगं वेदनां चापश्यम् ।

'साधारणम्' अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम्; बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन सखीभिः सह विचरन्त्यवसरे' ।

**XVI.** आङ्गलपदानां स्थाने संस्कृतपदानि उपयुज्य यात्राविवरणं पुनर्लिखत ।

**(1 × 5 = 5)**

दिसम्बर् मासस्य 25 तमे दिने विद्यालयात् बेंग्लूरु नगरं प्रति विनोदयात्रायै अगच्छाम । सायंकाले 6 वादने यात्राम् आरब्धवन्तः । संघे <u>Sixteen</u> बालकाः, <u>Fourteen</u> बालिकाः चत्वारः <u>Teachers</u> च आसन् । सर्वे वयं <u>Food</u> अनीतवन्तः । <u>In the morning</u> अष्टवादने बेंग्लूरु नगरं प्राप्तवन्तः च ।

(षोडश, अध्यापकाः, प्रभाते, चतुर्दश, भोजनम्)

**(6 × 1 = 6)**

**XVII.** यथोचितं योजयत ।

| | |
|---|---|
| शुककथा | कूटियाट्टम् |
| पी सी देवस्या | अष्टाध्यायी |
| पाणिनिः | क्रिस्तुभागवतम् |
| श्रीनारायणगुरुः | मुद्राराक्षसम् |
| पी.के. नारायणन्नम्प्यार् | दैवदशकम् |
| विशाखदत्तः | महाभारतम् |